National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 95-96
© 2019 NJHSR
www.sanskritarticle.com

डा. त. महेन्द्रः
सहायकाचार्यः,
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,
ज.ने.विश्वविद्यालयः, नवदेहली

Correspondence:
डा. त. महेन्द्रः
सहायकाचार्यः,
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,
ज.ने.विश्वविद्यालयः, नवदेहली

# संस्कृतदूरस्थशिक्षायाः विकासे नवाचाराणामावश्यकता

**डा. त. महेन्द्रः**

वैज्ञानिकेऽस्मिन् युगे विद्यायाः विकासः तावत् अतीव वेगेन जायमानो दृश्यते। अन्तर्जालादि-नवीनमाध्यमानामुपयोगः एवात्र प्रमुखं कारणमिति वक्तुं शक्यते। साम्प्रतं संस्कृतदूरस्थशिक्षा तावत् क्वचित् मुद्रितस्वयंशिक्षणसामग्रीमाधृत्य क्वचिच्च मूलग्रन्थानाधृत्य च प्रवर्तते। तया मुद्रितसामग्र्या साकं परामर्शदाः सम्पर्ककक्षाः अपि आयोज्यन्ते। किन्तु छात्राणां मार्गदर्शनाय आयोज्यमानासु तासु सम्पर्ककक्षासु उपस्थितिः तावत् अत्यन्तं न्यूना दरीदृश्यते। तत्र छात्राणां समयाभावः अथवा सुदूरक्षेत्रे विद्यमानं सम्पर्ककक्षाकेन्द्रं वा कारणं भवति। अनेन अध्येतारः स्वीयजिज्ञासायाः शङ्कायाश्च उपशमनं समाधानं वा नैव प्राप्नुवन्ति। अथ च संस्कृतं विश्वभाषेतिकारणात् बहवः जनाः तद्गतज्ञानार्जनाय समुत्सुकाः वर्तन्ते। अस्यां स्थितौ नवाचाराणां माध्यमेन संस्कृतदूरस्थशिक्षायाः विकासस्य आवश्यकता नितान्तं वर्तते। अतः आदौ संस्कृतदूरस्थशिक्षायाः अध्येतारः के? तेषां लक्ष्यञ्च किमिति जानीमः।

## अध्येतृवर्गः

संस्कृतदूरस्थशिक्षायाः अध्येतृवर्गः तावत् छात्राः उद्योगिनः सेवानिवृत्ताः गृहिण्यः इति चतुर्धा विभक्तुं शक्यते। तत्र छात्राः नियमितरूपेण अध्ययनं कुर्वन्तोऽपि दूरस्थशिक्षामाध्यमेन विषयान्तरेषु ज्ञानवर्धनं कर्तुमिच्छुकाः, तथा च अनियमितच्छात्राः अर्थात् स्पर्धावशात् अनुत्तीर्णवशाद् वा नियमितरूपेण अध्ययनं कर्तुमशक्ताः इति द्विविधाः भवन्ति। उद्योगिनस्तु ज्ञानवर्धनाय अध्येतारः, पदोन्नतादिप्रयोजनं निमित्तीकृत्य अध्ययनं कुर्वाणः इति द्विधा विभक्तुं शक्यते। सेवानिवृत्ताः गृहिण्यश्च समयाभावादिकारणवशात् अध्ययनं कर्तुमशक्ताः इत्येकः प्रकारः। प्रायः दूरस्थशिक्षामाध्यमेन अध्ययनरतानां लक्ष्यं ज्ञानार्जनं प्रमाणपत्रवाप्तिश्चेति द्विप्रकारकं भवति। एवंविधानां विभिन्नवर्गीयानां लक्ष्यपूर्तये दूरस्थशिक्षा कल्पवृक्षायते।

## समस्याः

प्रायः दूरस्थशिक्षामाध्यमेन अध्ययनरतैः छात्रैः अनुभूयमानसमस्यासु द्वे प्रमुखे समस्ये स्तः । तत्राद्या सम्पूर्णस्वाध्यायनसामग्र्याः अध्ययने अशक्तता। अपरा च स्वाध्यायसामग्र्याः अध्ययनकाले उदीयमानानां शङ्कानां समाधानाभावः अथवा मार्गदर्शनक्लेशः। अत एव दूरस्थशिक्षाप्रणाल्याम् अनिवार्यत्वेन परामर्शदाः सम्पर्ककक्षाः अपि संस्थापिताः । किन्तु एताः सम्पर्ककक्षाः तावत् दश आरभ्य पञ्चदशदिनात्मिकाः वर्षे चतुः अथवा पञ्चवारम् आयोजिताः भवन्ति। तासु दश अथवा पञ्चदशदिनात्मिकासु सम्पर्ककक्षासु सर्वोऽपि पाठ्यांशः अवगमयितुं नैव शक्यते। दूरस्थशिक्षामाध्यमेन अध्ययनरताः छात्राः महाजिज्ञासोपेताः भवन्ति। किन्तु समयाभावात् मार्गदर्शनक्लेशादिवशाद्वा तेषां जिज्ञासा नैव पूर्यते। अस्यामवस्थायां आकाशवाणी-दूरदर्शन-अन्तर्जालादीनां नवाचाराणां माध्यमेन तेषां जिज्ञासा पूरयितुं शक्यते।

## आकाशवाणीमाध्यमः

भारते आकाशवाणी-माध्यमस्य आरम्भः 1956 तमे वर्षे अजायत। साम्प्रतमस्य माध्यमस्य प्रचुरतरः उपयोगः सर्वैरपि क्रियते। समग्रे भारते आकाशवाण्याः 198 प्रसारकेन्द्राणि वर्तन्ते। प्रायः अस्याः प्रसाराः भारतस्य 97 प्रतिशतं भूभागपर्यन्तं व्यापृताः वर्तन्ते।

आकाशवाणीमाध्यमेन आद्यस्य विद्यासम्बद्धकार्यक्रमस्य आरम्भः तावत् इन्दिरागान्धी-मुक्तविश्वविद्यालयस्य सहयोगेन जनवरी 1992 तमे वर्षे मुम्बई-हैदराबाद-शिलांगकेन्द्राणां माध्यमेन अजायत। अनेन प्रयासेन भूरिशः अध्येतारः लाभान्विताः अभूवन्। किन्तु एते कार्यक्रमाः एकहोरात्मकाः एव आसन्। अतः भारतसर्वकारेण विद्यासम्बद्धकार्यक्रमाणां प्रसाराय एव 2001 तमे वर्षे ज्ञानवाणी-नाम्ना एकः आकाशवाणीमाध्यमः प्रकल्पितः वर्तते। अनेन माध्यमेन IGNOU, UGC, NCERT, IIT, IIM इत्यादिसंस्थानां सम्बद्धकार्यक्रमाः प्रसारिताः भवन्ति। यदि अस्माभिरपि संस्कृतदूरस्थशिक्षाक्षेत्रे अस्य माध्यमस्य उपयोगः क्रियते तर्हि बहवः छात्राः लाभान्विताः भवन्ति। यतो हि दूरदर्शनादीनां माध्यमानामुपयोगे यन्त्रेण साकं विद्युतादि-अन्यविधनां सौकर्याणामावश्यकता अनिवार्या भवति न तु आकाशवाण्याः कृते। अतः अनेन माध्यमेन सुदूरक्षेत्रे विद्यमानाः अध्येतारः अपि सुलभतया ज्ञानार्जनं कर्तुं पारयन्ति।

**दूरदर्शनमाध्यमः**

साम्प्रतं दूरदर्शनस्य उपयोगः सर्वत्र दृश्यते। दूरदर्शनमाध्यमेन दूरस्थशिक्षासम्बद्धकार्यक्रमाणां प्रसारः इन्दिरागान्धी-मुक्तविश्वविद्यालयस्य सहयोगेन 1991 वर्षे मे मासे आरब्धः। आदौ दूरदर्शनामकमाध्यमेन आरब्धेन प्रसारेण समुत्प्रेरितः सर्वकारः ज्ञानदर्शन-नामकः एकः दूरदर्शनप्रसारमाध्यमः पृथगेव प्रकल्पितः। अस्य आरम्भः 26 जनवरी 2001 तमे वर्षे अजायत। साम्प्रतं विश्वविद्यालयानुदानायोगेन अपि व्यास-नामकः अपरः दूरदर्शनप्रसारमाध्यमः समारब्धः। अनेन माध्यमेन दृश्यं श्रव्यञ्च आध्येतृभिः सम्यक् अनुभूयते। अनेन माध्यमेनापि संस्कृतदूरस्थशिक्षायाः विकासः कर्तुं शक्यते।

**अन्तर्जालमाध्यमः**

अद्य यावत् अन्तर्जालस्य आविष्करणं भूत्वा त्रिंशत् वर्षाणि व्यतीतानि। अस्य उपयोगः नगरवासिभिः आधिक्येन क्रियमाणः दृश्यते। अत्र e- learning, virtual learning, online learning इत्यादि नवीनाः प्रकाराः वर्तन्ते। उपर्युक्तमाध्यमयोरपेक्षया अनेन अन्तर्जालमाध्यमस्य वैशिष्ट्यं नितान्तं वर्तते। यतो हि आकाशवाणी-दूरदर्शनमाध्यमाभ्यां छात्राः केवलं द्रष्टुं श्रोतुञ्चैव प्रभवति। किन्तु वीक्षणकाले अथवा श्रवणकाले सद्यः उदीयमानानां शङ्कानां समाधानं प्राप्तुं नैव शक्नोति। किन्तु अन्तर्जालमाध्यमेन सर्वमपि साधयितुं प्रभवति।

**कर्तव्यानि**

1. तत्तद्विषयनिष्णातैः पाठिताः पाठाः विविधमाध्यमैः प्रसारणीयाः।
2. अध्यापिताः पाठाः सी.डी डी.वी.डी रूपेषु संस्थाप्य अध्येतृभ्यः प्रदेयाः।
3. Virtual Class Room प्रभृतिभिः माध्यमैः online मध्ये पाठाः अध्यापनीयाः।
4. संस्कृतविद्यायाः प्रसाराय पृथक् दूरदर्शनमाध्यमस्य आविष्कारः करणीयः।

**प्रयोजनम्**

प्रायः एतेषां नवीनमाध्यमानाम् आविष्कारो भूत्वा यद्यपि त्रिंशदधिकवर्षाणि व्यतीतानि। तथापि संस्कृतक्षेत्रे एतेषां क्रियान्वयनम् अत्यन्तं विरलतया एव अजायत इत्येव वक्तव्यम्। लोके तावत् आवश्यकतां पूरयितुमेव आविष्करणानि भवन्ति। अतः संस्कृतदूरस्थप्रणाल्याः विकासे एतेषां नवीनमाध्यमानां सन्निवेशेन किञ्चन अपूर्वमेव साधयितुं शक्यते। यतो हि अद्यत्वे मानवः बहु व्यस्तजीवनं यापयति। सीमिते समये सर्वमपि कर्म साधयितुं न प्रभवति। अतः सः स्वस्य जिज्ञासायाः उपशमनं स्वाभिलषिते समये अवाप्तुमिच्छति। अस्यामवस्थायां दूरस्थशिक्षाप्रणाल्यां प्रदीयमनया स्वध्यायसामग्र्या साकं नवीनमाध्यमानामुपयोगेन अध्येतृवर्गः अवश्यं लाभान्वितो भवतीति दिक्।

**सन्दर्भग्रन्थाः**


1. Aggarwal DD, Future of Distance Education, Sarup& Sons publi. New Delhi,2007.
2. IGNOU GyanVani: the educational FM radio network of India, a publicity material d developed by IGNOU, New Delhi, 2001.
3. Goelaruna&Goel SL., Distance Education in the 21st Century, Deep&Deep publications, New Delhi,2000.
4. Aggarwal, A., Web-based learning and teaching technologies: Opportunities and Challenges. Idea Group Publishing, 2000.
5. Goelaruna&Goel SL, Distance Education - Principles Potentialities & Perspectives, Deep&Deep publi., New Delhi.2009.
6. All India Radio: growth and development at http://www.air.org.in
7. Sharma, R. C., GyanVani: The Educational FM Radio Network of India, Field Notes (Vol. 2, No. 2), News from Asia, 2002., available http://www.irrodl.org/content/v2.2/field.html
8. IGNOU Course ES-318: Communication Technology for Distance Education, Post Graduate Diploma in Distance Education programme, New Delhi, 2000.
9. Sharma, R. C , Interactive Radio Counseling in Distance Education, University News, 40 (10), 11-17 Mar, pp. 8-11, 2002.